धनं तज्जातस्यापत्यस्य तदपत्याभावे संसर्गी स्वयं गृह्णीयात्। एवं सोदरस्य तु सोदरः ॥*॥ ततश्च संसृष्टिनस्तु संसृष्टीत्येतद्वचनं तुल्यरूपसम्बन्धिसंसर्गकृतविशेषप्रतिपत्त्यर्थं तेन सोदराणां सापत्नानां भ्रातृपुत्त्राणां पितृव्याणां तुल्यानां तद्भावे संसर्गी गृह्णीयात् वाक्यादविशेषश्रुतेः। पूर्व्ववचने सर्व्वेषामेव प्रकृतत्वात् सर्व्वेषु चाक्षेपासम्भवात्। अतो न भ्रातृमात्रविषयमिदं वचनमिति जीमूतवाहनः ॥ सोदरे त्वसंसृष्टिनि संसृष्टिन्यसोदरे च सति कतरस्तावत् गृह्णीयात्। एवंसोदरासोदरयोः संसृष्टयोः सद्भावे कतर इत्यत्र प्रथमत आह अन्योदर्य्यस्त्विति। अन्योदर्य्यः पुनः संसृष्टी सन् गृह्णीयात् नान्योदर्य्यमात्रः किन्तु असंसृष्टोऽपि पूर्व्ववचनस्थसोदरपदानुषङ्गात् प्राप्तः सोदरश्च गृह्णीयात्। तेन एकत्र विषये पूर्व्ववचनोक्तसंसृष्टत्वसोदरत्वयोरेकशस्तुल्यत्वादुभयोर्व्विभज्य ग्रहणम्। तदुभयसत्त्वे च असोदर्य्यस्यासंसृष्टिनोऽतुल्यरूपत्वात् नेति। द्वितीये आह संसृष्टो नान्यमातृज इति। सोदरे संसृष्टिनि सति अन्यमातृजः संसृष्ट्यपि न गृह्णीयात्। अर्थात्तत्र संसृष्टी सोदर एव गृह्णीयात्। संसृष्टत्वाविशेषेऽपि सोदरत्वेन तस्य बलवत्त्वात्। दायभागकारास्तु अन्योदर्य्यस्तु संसृष्टी सन् सत्यपि सोदरेऽसंसृष्टिनि धनं हरेत् नान्योदर्य्यः संसृष्टोऽपि गृह्णीयादिति पूर्व्वार्द्धस्यार्थः। तत्र किं सोदरस्तदानीं न गृह्णीयादेवेत्यपेक्षायामुत्तरार्द्धेनोक्तं असंसृष्टोऽपि चादद्यात् सोदर इत्यनुषज्यते न संसृष्टोऽन्यमातृजः केवलः। किन्तु उभाभ्यामेव विभज्य ग्रहीतव्यमित्याहुः। मिताक्षरादयोऽप्येवम्। याज्ञवल्क्यदीपकलिकायां शूलपाणिमहामहोपाध्यायस्तु। अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्यो धनं हरेत्। असंसृष्ट्यपि सोदर एव गृह्णीयात् न तु संसृष्टः सापत्नो भ्राता। संसृष्ट इति गर्भसंसृष्टः सोदर इति केचित्। नान्योदर्य्यो धनं हरेत् इति पाठे अन्योदर्य्यः सन् धनं न गृह्णीयात् इति व्याख्या असंसृष्टसोदरस्याधिकारार्थमिदं वचनमतो न पुनरुक्तिरित्याहुः। रत्नाकरप्रभृतयस्तु कल्पतरौ नान्योदर्य्यधनं हरेदिति पाठो दृश्यते स मूलभूतयाज्ञवल्क्यमिताक्षरापारिजातहलायुधग्रन्थेषु नान्योदर्य्यो धनं हरेदिति पाठदर्शनात् तदनुसारव्याख्यादर्शनाच्च लिपिकरप्रमाद इत्याहुः। इति दायतत्त्वम् ॥

संसृष्टत्वं, क्ली, (संसृष्ट + त्व।) संसृष्टस्य भावः। यथा। तेन एकत्र विषये पूर्व्ववचनोक्तसंसृष्टत्वसोदरत्वयोरेकशस्तुल्यत्वादुभयोर्व्विभज्य ग्रहणम्। इति दायतत्त्वम् ॥

संसृष्टी, [न्] पुं, संसृष्टं संसृष्टत्वमस्यास्तीति। इनिः।) संसृष्टत्वविशिष्टः। यथा, याज्ञवल्क्यः ॥

"संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः।
दद्याच्चापहरेदंशं जातस्य च मृतस्य च ॥
अन्योदर्य्यस्तु संसृष्टी नान्योदर्य्यो धनं हरेत्।
असंसृष्टोऽपि चादद्यात् संसृष्टो नान्यमातृजः ॥"
इति दायतत्त्वम् ॥

संस्कारः, पुं, (सं + कृ + घञ्।) प्रतियत्नः। अनुभवः। मानसकर्म्म इति मेदिनी ॥ न्यायमते गुणविशेषः। स च त्रिविधः। वेगाख्यसंस्कारः १ अयं मूर्त्तपदार्थस्थायी। क्वचिद्वेगजन्यः क्वचित्कर्म्मजन्यश्च। स्थितिस्थापकसंस्कारः २ अयं पृथिवीगुणः केषाञ्चिन्मते पृथिव्यादिचतुःपदार्थगुणः। अयं अतिन्द्रियः स्पन्दनकारणञ्च। भावनाख्यसंस्कारः ३ अयं आत्मनः अतीन्द्रियगुणः। उपेक्षानात्मकनिश्चयजन्यः। अयं स्मरणप्रत्यभिज्ञयोः कारणञ्च ॥*॥ अस्य प्रमाणम्।

"संस्कारभेदो वेगोऽथ स्थितिस्थापकभावने।
मूर्त्तमात्रे तु वेगः स्यात् कर्म्मजो वेगजः क्वचित् ॥
स्थितिस्थापकसंस्कारः क्षितौ केचिच्चतुर्ष्वपि।
अतीन्द्रियः स विज्ञेयः क्वचित् स्पन्देऽपि कारणम् ॥
भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः।
उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत् ॥
स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते ॥"
इति भाषापरिच्छेदः ॥*॥

शुद्धिः अदृष्टविशेषजनककर्म्म। यथा। यदाग्निस्थापनानन्तरं कर्म्मकाले दृष्ट्यादिशङ्कया संस्कृताग्निरन्यत्रानीयते तदा पुनर्भूसंस्कारः कर्त्तव्यः। संमृज्य उपलिप्य उल्लिख्य उद्धृत्य अभ्युक्षयेत् एष संस्कारोऽनुगतोऽग्नौ भूयः। इति गृह्यान्तरात्। इति संस्कारतत्त्वम् ॥*॥ दशविधसंस्कारा यथा। विवाहः १ गर्भाधानम् २ पुंसवनम् ३ सीमन्तोन्नयनम् ४ जातकर्म्म ५ नामकरणम् ६ अन्नप्राशनम् ७ चूडाकरणम् ८ उपनयनम् ९ समावर्त्तनम् १०। यथा हारीतः। गर्भाधानवदुपेतो ब्रह्मगर्भं सन्दधाति पुंसवनात् पुंसीकरोति फलस्थापनात् मातापितृज पाप्मानमपोहति रेतोरक्तगर्भोपघातः पञ्चगुणो जातकर्म्मणा प्रथममपोहति नामकरणेन द्वितीयं प्राशनेन तृतीयं चूडाकरणेन चतुर्थं स्नापनेन पञ्चमं एतैरष्टाभिः संस्कारैर्गर्भोपघातात् पूतो भवतीति। स्नानमत्र समावर्त्तनरूपमिति कल्पतरुः। इति संस्कारतत्त्वम् ॥*॥ याज्ञवल्क्यः।

"गर्भाधानमृतौ पुंसः सवनं स्पन्दनात् पुरा।
षष्ठेऽष्टमे वा सीमन्तः प्रसवे जातकर्म्म च ॥
अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः।
षष्ठेऽन्नप्राशनं मासि चूडा कार्य्या यथाकुलम् ॥
एवमेनः शमं याति वीजगर्भसमुद्भवम् ॥"
इति मलमासतत्त्वम् ॥*॥

संस्कृतानामधिकारमाह याज्ञवल्क्यः।

"असंस्कृतास्तु संस्कार्य्या भ्रातृभिः पूर्व्वसंस्कृतैः।
भगिन्यश्च निजादंशाद्दत्त्वांशन्तु तुरीयकम् ॥"

असंस्कृता भ्रातरो भगिन्यश्च पूर्व्वसंस्कृतैरुपनीतैः। अन्यथा मन्त्रपाठानधिकारापत्तेः इत्युद्वाहतत्त्वम् ॥ एषां विवरणं तत्तच्छब्दे द्रष्टव्यम्। गरुडपुराणोक्तसंस्कारास्तत्रैव ९३। ९४। ९५ अध्यायेषु द्रष्टव्याः ॥ * ॥

अथ जीर्णदेवगृहादिसंस्कारफलम्।

"अथ चेज्जीर्णसंस्कारविधिः पुण्यो महामुने!
देवतादिषु कर्त्तव्यो महाभोगफलेप्सुभिः ॥
मूलादष्टगुणं पुण्यं जीर्णसंस्कारतो भवेत्।
तस्मादनाथजीर्णेषु कार्य्यं संस्करणं मुने!।
स्वकीयं परकीयं वा यथाविभवविस्तरैः ॥
स्वतो वा परतो वापि यस्तु संस्कुरुते सुरान्।
स यावच्चन्द्रसूर्य्यौ गौस्तावत्कालं सुखी भवेत् ॥
लोकेषु तेषु देवानां विरजस्केषु हृष्टधीः।
यथा गोमेधयज्ञेषु पशुरोमसमाः समाः ॥
वसते दिवि हृष्टात्मा जीर्णसंस्कारकारकः।
अनाथा वा सनाथा वा पूजनीयाः सदा सुराः ॥
इति देवीपुराणे पूजाविधिनामाध्यायः ॥

संस्कारजः, त्रि, संस्कारेण जातः। संस्कारशब्दपूर्व्वकजनधातोर्डप्रत्ययेन निष्पन्नः ॥

संस्कारवर्ज्जितः, पुं, (संस्कारेण जातः।) उपनयनसंस्कारहीनः। तत्पर्य्यायः। व्रात्यः २। इति हेमचन्द्रः ॥ दशसंस्कारहीने, त्रि ॥

संस्कारहीनः, पुं, (संस्कारहीनः।) व्रात्यः। इत्यमरः ॥ संस्कारहीनत्वकालमाह। यमः।

"पतिता यस्य सावित्री दशवर्षाणि पञ्च च।
ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययोः।
प्रायश्चित्तं भवेदेषां प्रोवाच वदतां वरः ॥"

तथा मार्कण्डेयः।

"विप्रस्य षोडशाद्वर्षात् राज्ञो द्वाविंशतेः परम्।
वैश्यस्याष्टाधिकादब्दात् सावित्रीपतनं भवेत् ॥"

विष्णुधर्म्मोत्तरे।

"षोडशाब्दा हि विप्रस्य राजन्यस्य द्विविंशतिः।
विंशतिः सचतुर्थी च वैश्यस्य परिकीर्त्तिता ॥
सावित्री नातिवर्त्तेत अत ऊर्द्ध्वं निवर्त्तते ॥"
इति मलमासतत्त्वम् ॥

संस्कृतं, क्ली, (सं + कृ + क्तः।) लक्षणोपेतम्। इति मेदिनी ॥ पाणिन्यादिकृतव्याकरणसूत्रेण उपेत उपगतो लक्षणोपेतः साधुशब्दः। इत्यमरटीकायां भरतः ॥ स तु देववाणी। यथा,

"गीर्व्वाणवाणीवदनं मुकुन्द-
संकीर्त्तनञ्चेत्युभयं हि लोके।
सुदुर्लभं तच्च न मुग्धबोधा-
न्न लभ्यतेऽतः पठनीयमेतत् ॥"
इति मुग्धबोधव्याकरणप्रशंसाश्लोकः ॥

संस्कृतः, त्रि, (सं + कृ + क्तः।) कृत्रिमः। इत्यमरः ॥ करणेन निर्वृत्तः कृत्रिमो घटादिः। इति भरतः ॥ पक्वः। स्वतो गुणान्तराधानम्।